D.Y NO - 683
15.09.2021

Gmail

Prof. Khageswar Mishra <principalpuri2009@gmail.com>

## 'राष्ट्री'(ISSN-2321-6948) - पत्रिकायाः परिसरनिदेशकानां प्रो. जे. भानुमूर्तिमहोदयानामभिनन्दनविशेषाङ्काय संस्मरण- निबन्ध-काव्यादीनामामन्त्रणम्।

1 message

**Central Sanakrit University bhopal Campus** <rashtricsu@gmail.com> Wed, Sep 15, 2021 at 8:21 AM
Bcc: principalpuri2009@gmail.com

Respected Sir,
Please find the letter regarding "**Call for Memoirs / Research Papers in Sanskrit / Hindi / English for the "Prof. J. Bhanumurthy Felicitation Volume of Rāshtrī (ISSN- 2321-6948)"**
**A Line of acknowledgement will be appreciated.**

**Thanking you.**

**Regards,**
**Sugyan Kumar Mahanty,**
**For *Rāshtrī-2021-22***
**केन्द्रीय संस्कृत विश्वविद्यालय**
भोपाल परिसर, भोपाल
संस्कृतमार्ग, बागसेवनिया, भोपाल- 462043

**NOTIFICATION- RASHTREE-2021-22.pdf**
2132K

SO
15/09/2021

Placed in campus website

Director

M-2

# केन्द्रीय संस्कृत विश्वविद्यालय

संसद के अधिनियम द्वारा स्थापित
( शिक्षा मंत्रालय, भारत सरकार के अधीन )

भोपाल परिसर, संस्कृत मार्ग,
बागसेवनिया, भोपाल - 462043


क्रमांक के.सं.वि./भो.प./राष्ट्री/2021-22/ दिनांक : 22.07.2021

"प्रति बध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः" – कालिदासः

विषयः – 'राष्ट्री'(ISSN-2321-6948) - पत्रिकायाः परिसरनिदेशकानां प्रो. जे. भानुमूर्तिमहोदयानाम-भिनन्दनविशेषाङ्काय संस्मरण- निबन्ध-काव्यादीनामामन्त्रणम्।

मान्याः!

विदन्ति खलु तत्रभवन्तो भवन्तो यत् साहित्य-शिक्षाशास्त्र-दर्शनशास्त्रादिषु नैकेषु शास्त्रपरम्पराप्रस्थानेषु तलस्पर्शिवैदुष्यं भजन्तः प्रो. जे. भानुमूर्तिमहोदयाः सम्प्रति केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे निदेशकपदमलङ्कुर्वाणाः सुरसरस्वतीसेवायां महत्तरमुत्तरदायित्वं निर्वहन्ति।

आगामिनि वर्षे आचार्याणां श्रीमद्भानुमूर्तिवर्याणां सेवानिवृत्तिर्भवितेति तेषां व्यक्तित्वकृतित्वादिसञ्जुष्टं शास्त्रीयतत्वप्रकाशनपरम् अभिनन्दनग्रन्थमेकं 'राष्ट्री' (ISSN-2321-6948) इत्यस्मत्परिसरीय-वार्षिकपत्रिकाया विशेषाङ्करूपेण प्रकाशयितुं कृतसङ्कल्पा वयम्।

अतो भवन्तो भवत्यश्च निवेद्यन्ते यदाचार्याणां भानुमूर्तिमहोदयानां व्यक्तित्व-कृतित्व-प्रकाशनपरं गद्यात्मकं पद्यात्मकं वा लेखम् आहोस्वित् शास्त्रीयविषयमधिकृत्य निबन्धं संस्कृत-हिन्दी-आङ्ग्ल-भाषास्वन्यतमामवलम्ब्य Unicode font द्वारा MS Word File मध्ये टङ्कयित्वा / हस्तलेखं वा rashtricsu@gmail.com प्रति Email द्वारा 30.09.2021 पर्यन्तं सम्प्रेष्याऽस्मान् कृतार्थयन्तु। आचार्यभानुमूर्तिमहोदयानां जीवनसरणेः संक्षिप्तवृत्तमत्र भवदभिज्ञानाय संलग्नमस्ति।

निवेदकः

(प्रो. सुबोध शर्मा)
अध्यक्षः – प्रकाशनसमितिः

सम्पर्कसूत्रम् –

1. प्रो. श्रीगोविन्दपाण्डेयः – 8435000797
2. डॉ. सुज्ञानकुमारमाहान्तिः – 9625627362
3. श्रीप्रतापशास्त्री - 9968171966
4. डॉ. डम्बरुधरपतिः - 7617334906


**Tel.:** (O) 0755-2418043, (Edu.) 2418094, (MSP) 2418085 **Fax :** 0755-24180003
• **E-mail :** rsks_bhopal@yahoo.com, csubhopal@gmail.com • **Website :** rsksbhopal.ac.in

## 'सरस्वती श्रुतिमहतां महीयताम्'

## आचार्य जे. भानुमूर्तिमहोदयानां संक्षिप्तं कृतित्वं व्यक्तित्वञ्च

भारतीयविद्यापरम्पराशिक्षादीक्षिताः संस्कृतसंस्कृतिप्रवाहसंवाहकाः केन्द्रीय-संस्कृत-विश्वविद्यालयस्य भोपालपरिसरस्य यशस्विनो निदेशकाः प्रो. जे.भानुमूर्तिमहोदयाः व्याकरण-साहित्य-दर्शन-शिक्षाशास्त्रादिषु अनन्यसुलभपाण्डित्यमण्डिताः राष्ट्रियसंस्कृतसंस्थानमिति ख्यातपूर्वस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य आसेतु हिमाचलं विद्यमानेषु विविधपरिसरेषु नैजतपोनिष्ठसेवया अमरभारतीपरिवारमुपचक्रुः। इमे 15.03.1957 तमे दिनाङ्के आन्ध्रप्रदेशे लब्धजन्मानः पित्रोः श्रीमतीनागलक्ष्मम्मा-श्रीलक्ष्मी-नारायणजम्मलमडकयोः उत्सङ्गे वात्सल्यरसमनुभवन्तः लीलया बाल्यकालं यापयामासुः। तीर्णशैशवैः विहितोपनयनसंस्कारैः ब्रह्मचर्यं चरद्भिः तैः प्रतिष्ठितेभ्यो विद्यागुरुभ्यः साम्बमूर्तिशास्त्रि- मल्लुसोमयाजुलु-वीरेश्वरशास्त्रि- श्रीधरवाशिष्ठ- आरलिकट्टि-चन्द्रशेखरपाण्डेय-विनयकुमाररायप्रभृतिभ्यः पारम्परिकरीत्या व्याकरण-न्याय-साहित्यमीमांसा-वेदान्तशिक्षाशास्त्रादीनि अधीत्य अधीतिबोधाचरणप्रचारैः विद्यानां चतुर्दशत्वमन्वर्थीकृतम्।

प्रो. भानुमूर्तिमहोदयैः निजसेवाकाले शिक्षाशास्त्रे आचार्यत्वेन शिक्षाविभागाध्यक्षत्वेन परिसरनिदेशकत्वेन च निजकार्यकुशलताद्वारा प्रशासनपटुताम् अनुशासननिष्ठतां च प्रमाणयद्भिः समानुरागपूर्वकम् आनुषङ्गिकानि शास्त्राण्यपि अधीतेभ्योऽध्यापितानि।

श्रीमत्या जे. जयलक्ष्मीत्यभिधया सुश्रूषाशीलया विदुष्या धर्मपरायणया गृहलक्ष्म्या सह रममाणः श्रीभानुमूर्तिमहोदयः गार्हस्थ्यमाचरन् वरुण-प्रत्याशाख्यौ सुयोग्यौ पुत्रौ प्राप।

सुरसरस्वतीसाधनाधनिना प्रो. भानुमूर्तिना शिवसूत्रं, चारुचर्या, चित्रबन्धरामायणम् इति त्रयो ग्रन्थाः सम्पादिताः, अधिगममनोविज्ञानं, संस्कृतशिक्षणे मातृभाषाप्रभावश्चेति द्वौ मौलिकौ ग्रन्थौ रचितौ।

संस्कृत-तेलुगु-हिन्दी-आङ्ग्लादिभाषासु समानदक्षतां प्रमाणयद्भिः प्रो. भानुमूर्तिमहोदयैः विविधासु राष्ट्रियान्ताराष्ट्रियसङ्गोष्ठीषु शोधपत्राणि प्रस्तूय अनेकेषु शैक्षिककार्यक्रमेषु संसाधक-मुख्यातिथित्वेन अलङ्कृत्य अमरभारतीविजयवैजयन्ती चिरमुदञ्चिता।

आर्षपरम्परासंवाहकानां प्रो. जे.भानुमूर्तिमहोदयानां सरलनिराडम्बरमयं सम्पूर्णं जीवनं सत्यनिष्ठया, स्वाध्यायतपश्चर्यया, शास्त्रव्यसनतया वाग्देवीसमर्चनया च परिपूतमस्ति।

| | | |
|---|---|---|
| नाम | - | प्रो. जे. भानुमूर्तिः |
| जन्मतिथिः | - | 15.03.1957 |
| कार्यक्षेत्रम् | - | राष्ट्रियसंस्कृतसंस्थानस्य जयपुर-शृङ्गेरी-गुरुवायूर-पुरी-जम्मू-भोपालपरिसराः |
| वर्तमानपदम् | - | निदेशकः, केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः, भोपालम्। |
| मण्डलम् | - | आन्ध्रप्रदेशः |
| माता | - | श्रीमती नागलक्ष्मम्मा |
| पिता | - | श्री लक्ष्मीनारायणजम्मलमडकः |
| गुरवः | - | श्री साम्बमूर्तिशास्त्री, श्रीमल्लुसोमयाजुलुः, वीरेश्वरशास्त्री, श्री श्रीधरवसिष्ठः, श्री आरलिकट्टिः, चन्द्रशेखरपाण्डेयः, श्री विनयकुमाररायः |
| कृतयः | - | सम्पादनम् – 1. शिवसूत्रम्, 2. चारुचर्या, 3. चित्रबन्धरामायणम्<br>मौलिकरचना- 1. अधिगममनोविज्ञानम्, 2. संस्कृतशिक्षणे मातृभाषाप्रभावः |

## Excerpt in English

**Sub: Call for Memoirs / Research Papers in Sanskrit / Hindi / English for the "Prof. J. BhanumurthyFelicitation Volume of Rāshtrī (ISSN- 2321-6948)"**

**Respected Scholars !,**

We are delighted to inform you that **Prof. J. Bhanumurthy**, a distinguished & erudite scholar of traditional learning on Indology, presently holding the post of director in the Bhopal Campus of Central Sanskrit University, New Delhi, is best known in the field of Sanskrit. Now in honor of **Prof. J. Bhanumurthy,** we intend to bring out a Felicitation Volume of ***Rāshtrī* (ISSN- 2321-6948),** the annual research journal of the campus, before his retirement, i.e. March, 2022, for which **Memoirs / Research Papers in Sanskrit or Hindi or English are invited.** The Same, typed in Unicode font on MS Word file, may please be emailed to rashtricsu@gmail.com **by 30th September, 2021.** A brief life sketch of **Prof. J. Bhanumurthy** is provided below.

- Name – **Prof. Bhanumurthy jammalamadaka**
- Date of birth – 15. 03. 1957
- Place of birth – Andhra Pradesh, India
- Father – Sh. Lakshmi narayan jammalakadaka
- Mother – Ms. Nagalakshmamma
- Preceptors – Pt. S. Shambamurthy Shastri, Pt. Varaprasad, Pt. G. Subrahmanya Shastri, Pt. A. Mallu Somayajulu, Pt. K. D. S. Shastri, Pt. Vireshvara Shastri Dongre, Pt.Shreedhara vashishtha, Pt. R. N. Aralikkati, Pt. Chandrashekhar Pandey, Pt. Vinay Kumar Rai.
- Wife- Mrs. J. Jayalakshmi, Son- Mr. J. S. M. Varuna, Daughter- Ms. T.Pratyasha.
- Present Post – Director, Central Sanskrit University, Bhopal Campus.
- Places of work – Jaipur, Shringeri, Guruvayur, Puri, Jammu and Bhopal Campuses of Rashtriya Sanskrit Sansthan.
- Academic qualifications- M.A. (Sanskrit & Hindi), Shikshacharya (M.Ed.) Vidyavaridhi (Ph.D.)
- Experience in Teaching and Research – 32 years
- Publications –
  - Edited: ***Sivaūtrāni, Cārucaryā & Citrabandharāmāyaṇam***
  - Authored: ***Adhigamamanovijñānam,***
    ***Saṃkṛtaśikṣaṇe mātṛbhāṣāprabhāvaḥ***

**Please Contact for any kind of support:**

Prof. Govind Pandey – 918435000797
Dr. Sugyan Kumar Mahanty -91 9625627362
Sh. Pratap Shastri - 919968171966
Dr. Dambarudhar pati – 917617334906

**CENTRAL SANSKRIT UNIVERSITY, BHOPAL CAMPUS, BAGSEVANIYA, BHOPAL, MP. INDIA – 462043.**

Thank you.